International Journal of Sanskrit Research 2020; 6(2): 304-306

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 304-306
© 2020 IJSR
www.anantaajournal.com
Received: 03-01-2020
Accepted: 29-02-2020

**S Sitarama Rao**
Assistant Professor, Department of Paraskara Pourohitya, SV Vedic University, Tirupati, Andhra Pradesh, India

**Corresponding Author:**
**S Sitarama Rao**
Assistant Professor, Department of Paraskara Pourohitya, SV Vedic University, Tirupati, Andhra Pradesh, India

# कात्यायनोक्तमूलानक्षत्रशान्तिविचारः

## S Sitarama Rao

## प्रस्तावना

**उपोद्घातः** शान्तिर्नामअस्पष्टपापनिदानकैहिकमात्रानिष्टनिवर्तकंपापप्रयोजकंवैधं कर्म ।

पित्रारिष्टेसुतारिष्टेमात्रारिष्टेतथैव च ।

प्रायश्चित्तंततःकुर्यात्तत्तद्दोषस्यशान्तये[1]॥ इति

गर्गवचनात्दुष्टतिथिनक्षत्रादिजनितदोषनिवारणार्थंसर्वारिष्टविनाशार्थं चशान्तिविधानं विधिवत् कर्तव्यंभवति । शान्तिभेदाः -

शान्तयश्चविभिन्नाःशान्तिकमलाकरशान्तिमयूखशान्तिसागरप्रभृतिमहानिबन्धेषुप्रतिपादिताः ।

एतासांवर्गीकरणमेवंभवितुंयुज्यते ।

१. जननशान्तयः - आसामनुष्ठानंजननंनिमित्तमादायप्रवर्तते ।
२. वयःशान्तयः–षष्ठ्यब्दादौशारीरावस्थाविशेषेणप्रवर्तमानाउग्ररथशान्त्यादयः ।
३. अद्भुतशान्तयः–औत्पातिकंनिमित्तंउल्कापातादिकमुद्दिश्यविहिताःशान्तयः।
४. परिस्थितिशान्तयः–आशौचादिप्राप्तौविवाहादिकर्तव्यतायां, मण्डपेकन्यायारजःस्त्रावेचेत्येवमादिविशेषपरिस्थितिषुविहिताःश्रीशान्त्यादयः ।
५. उपसर्गशान्तयः– प्रेत गन्धर्वगृहीतत्वाद्युपसर्गप्रयुक्ततयाक्रियमाणाविनायकशान्त्यादयः ।

### मूलानक्षत्रजननशान्तिः

कात्यायनेनमूलानक्षत्रस्वरूपंप्रधानतयापरिशिष्टेप्रतिपादितम् ।

अथातोमूलविधिंव्याख्यास्यामोमूलांशेप्रथमेपितृर्नेष्टो, द्वितीयेमातुस्तृतीयेधनधान्यस्य, चतुर्थेकुलशोकावहः स्वयं पुण्यभागीस्यान्मूलनक्षत्रेमूलविधानंकुर्यात्[2] इति सूत्रात्शिशुः मूलस्यप्रथमपादेजननेनपितृनाशः, द्वितीयेमातृनाशः, तृतीयेधनधान्यनाशः, चतुर्थेकुलनाशःसम्भवति इति वचनात्शान्तिविधिःप्रतिपादितः । तथा च सुतः सुता वानियतंहन्तिमूलजा[3] इति

संस्कारमार्तण्डोक्तकन्यापुत्रयोर्विशेषेणमूलूजननेश्वशुरनाशःसम्भवति इति शौनकोक्तवचनाच्चतद्दोषनिवारणार्थंजननात्द्वादशेऽहनि विधिवत् शान्तिः कार्या । काश्यपेनमूलनक्षत्रफलम् एवं ब्रूते –

मूलाद्यपादजोहन्तिपितरन्तुद्वितीयजः ।
मातरंस्वांतृतीयोऽर्थान्सुहृदंतुतुरीयजः ।
फलंतदेवसार्पर्क्षेप्रतीपंत्वन्त्यपादतः[4] ॥

**नक्षत्रशान्तिस्वरूपम्**

शुभेऽहनिसङ्कल्प्यशान्त्यङ्गभूतंगणपतिपूजनम्, पुण्याहवाचनम्, मातृकापूजनम्, वसोर्धारापूजनम्, नान्दीश्राद्धं च कृत्वा, ततःरुद्रावाहनार्थंविधिनाएकंकलशंप्रतिष्ठाप्य,तत्रतीर्थोदक, सपल्लव, क्षीरद्रुमशाखापञ्चत्वक्पञ्चरत्नसर्वौषधिगन्धपुष्पफलदूर्वा-सर्षपसप्तमृत्तिकापञ्चगव्यादीनितत्तल्लिङ्गकैर्मन्त्रैःप्रक्षेपणंकृत्वा,रुद्रमावाह्य, अभ्यर्च्यरुद्रैकादशीम्, यथासम्भवंशान्त्यध्यायादीन्जपेत्, ततः वरुण स्थापनार्थंरुद्रकलशादुत्तरतःकुम्भमेकंप्रतिष्ठाप्यतीर्थ-जलेनआपूर्यवस्त्रावगुष्ठितानिशतमूलानि च प्रक्षिपेयुः, ततः विधिवत् वरुणंप्रतिष्ठाप्यअभ्यर्च्यप्रार्थयेत्, सर्वौषधिकलश-सम्पातोदकेनपितरंसापत्यंमातरञ्चअभिषिञ्चेत्। ततः विधिवत् अग्निप्रतिष्ठापनंकृत्वाईशान्यांग्रहमण्डलार्चनंकृत्वाततः विधिवत् अग्निसंस्कारंकृत्वाग्रहमण्डपदेवताहोमंसमित् – तिल – चरु – आज्यद्रव्यैःहोमंविधायअसुन्वन्तमितिमन्त्रचतुष्टयेनपायसहवनंभवति, ततःकृणुष्वपाजेतिपञ्चभिःमन्त्रैः – मानस्तोक इत्यादि मन्त्रैश्चआज्याहुतीःहुत्वा, बलीन्पूर्णाहुतिंदत्वाहोमशेषं समाप्य विधिवत् प्रतिमादिकंआचार्यहस्तेप्रतिपाद्य, आचार्यायकृष्णांगाम्, कृष्णतिलान्, सप्तधान्यसंयुक्तंहिरण्यमूलम्दत्वा, ब्रह्मणेकृष्णं-अनुडुहम्, अन्येभ्योनक्षत्रसूचकेभ्योब्राह्मणेभ्यःवासोदा-नम्कार्यम्, अन्येभ्यःब्राह्मणेभ्यःहिरण्यादिकंदद्यात्, ततः कर्मसाङ्गतासिद्ध्यर्थं-ब्राह्मणभोजनंआचरणीयंभवति । एवमेवविधिनासार्पदैवते – गण्डजाते – जातानामयमेवविधिनाशा-न्तिर्भवतीतिगृह्यपरिशिष्ट-वचनात्ज्ञायते ।

**शान्त्याचरणप्रयोजनम्**

तपःपरंकृतयुगेत्रेतायांज्ञानमुच्यते ।
द्वापरेयज्ञमेवाहुःदानमेकंकलौयुगे[5] ॥

कलियुगेविशेषेण दान जप अनुष्ठानेन विशेष फलानिमानवाःप्राप्नुवन्ति । इति आर्योक्तवचनानुसारंज्ञायते । यःग्रहःदुष्ठस्थानेअस्तिचेत्तस्यग्रहस्यप्रीतिनिमित्ताय जप-तर्पण-हवन-दानानिआचरणेनशुभफलानिप्राप्नुवन्तिमानवाः इति याज्ञवल्यस्मृत्युक्तवचनेनज्ञायते ।

यश्चयस्ययदादुष्टः स तंयत्नेनपूजयेत् ।
ब्रह्मणैषांवरोदत्तःपूजिताःपूजयिष्यथ[6] ॥

एवं प्रायश्चित्त निवृत्यर्थं – पाप उपशमनार्थं च जप – अनुष्ठाना-चरणंकर्तव्यमितिशातातपवचनानुसारंज्ञायते ।

पूर्वजन्मकृतंपापंव्याधिरूपेणपीड्यते ।
तच्छान्तिरोषधैर्दानैः जप-होम-सुरार्चनैः ॥
तथा च - श्रीकामःशान्तिकामोवाग्रहयज्ञंसमाचरेत् ।
वृष्ट्यायुःपुष्टिकामोवातथैवाऽभिचरन्नपि[7] ॥

श्रीकामं – शान्तिकामं – वृष्ट्यायुः – पुष्टिकामं – अभिचारकामये वाच्छन्तितेग्रहयज्ञं विधिवत् समाचरेत् इति याज्ञवल्क्यस्मृत्युक्तवचनानुसारंगम्यते ।

ग्रहाधीनांनरेन्द्राणामुच्छ्रायाःपतनानि च ।
भावाभावौ च जगतस्तस्मात्पूज्यतमाग्रहाः[8] ॥

नरेन्द्राणाम् अपि उच्छ्रायपतनानिग्रहाधीनानि, जगतःस्थावरजङ्ग-मात्मकस्यभावाभावौ व्युत्पत्ति निरोधौग्रहाधीनौ, अतः तद्योगक्षेमकारिणांपूज्यतमाःग्रहाः इति ज्ञायते ।

ग्रहाणामिदमातिथ्यंकुर्यात्संवत्सरादपि ।
आरोग्यबलसम्पन्नोजीवेत्सशरदःशतम्[9] ॥

अतः एवं ग्रहाणांसंवत्सरमध्येएकवारंवापूजादिनासन्तर्पयेत् । तेन आरोग्य – ऐश्वर्यादिकंशतजीवनपर्यन्तंसिध्यतीतिज्ञायते । उपर्युक्तविधानैःदुष्टतिथ्यादिजननसमयेलग्नेदुष्टग्रहसंचारेणअलक्ष्मीः प्राप्नोति। तत् कारणात्शान्तिविधानेनतत्तद्देवताःतर्पयन्तिचेत्इष्ट-काम्यप्राप्तिंप्राप्नुयात् ।

## सन्दर्भः


1. संस्कारगणपतिः पृष्ठम् 486
2. पारस्करगृह्यसूत्रम्
3. संस्कारमार्तण्डः पृष्ठम् 170
4. पारस्करगृह्यसूत्रगदाधरभाष्यम् पृष्ठम् 165
5. मनुस्मृतिः 1.86
6. याज्ञवल्क्यस्मृतिः 1.307
7. याज्ञवल्क्यस्मृतिः 1.295
8. याज्ञवल्क्यस्मृतिः 1.308
9. याज्ञवल्क्यस्मृतिः 1.307.1